# सामिधेनी मन्त्राणाम् विवरणम्

DSV Jagannatha Sharma
Assistant Professor
Kalpa Department, S.V. Vedic University,Tirupati

**प्र वो॒ वाजा॒ इत्यन्वा॒हान्नं॒ वै वाजोन्न॑मे॒वाव॑ रुन्द्धे प्र वा॒ वाजा॒ इत्यन्वा॑ह तस्मा॑त् प्राचीनँ रेतो धीयतेग्न आ या॑हि वीतय॒ इत्या॑ह तस्मा॑तुं प्रतीचीः प्र॒जा जा॑यन्ते प्र वो वाजा॒ (३) इत्यन्या॑ह मासा॒ वै वाजा॑ अर्धमा॒सा अ॒भिद्य॑वो दे॒वा ह॒विष्म॑न्तो॒ गौर्धृताच**

**प्राचीनमिति।**

उपसर्गविशेषसंबन्धेन स्तुतिः। प्रगतं प्राचीनम्।

[1]"*विभाषाञ्चेरदिस्त्रियाम्" (पा ५-४-८) इति खः॥'अग्न आ याहि' इति द्वितीया ऋक् ॥

आयाहि इति वचनात् प्राचीनं निहितं रेतः प्रतीचीनं* प्रजावेन परिणतं निर्गच्छति।प्रतिकूलाः प्रतीच्यः।

"वा छन्दसि" (६.१.१०६) इति पूर्वसवर्णदीर्घत्वम्।

"चौ" (पा ६.३.१३८) इति पूर्वपदस्य दीर्घत्वम्, अन्तोदात्तत्वं च (पा ६·१·२२२)॥

मासा वा इत्यादि || मन्त्रपदानां सर्वेषां स्तुतिः।

हे ऋत्विग्यजमानाः वाजादयो युष्माकम् अभिमतसिद्धये भवन्तु।

वाजाः मासाः अन्नहेतवः; गतिमन्तो वा सर्वक्रियाणामाधाराः।

अर्धमासाः [2]"अभिद्यवः दिवसैरभिगतदीप्तित्वात्" साभिप्रायेण क्रियाप्रवर्तकाः। हविष्मन्तः

**प्रेति ॥**

अस्मिन् मन्त्रे वाजशब्दोच्चारणं प्रशंसति- 'प्र वो वाजा इत्यन्वाहानं वै वाजोन्नमेवाव रुन्द्धे' इति ॥

**प्रेति ॥**

तथात्र प्रशब्दोच्चारणं प्रशंसति- 'प्र वो वाजा इत्यन्वाह तस्मात् प्राचीनँ रेतो 'धीयते ' इति॥

यस्मात् प्रशब्द उच्चारितः तस्मात् प्राचीन प्रमुखे रेतोवर्तिनि योषिच्छरीरेञ्चति गच्छतीति प्राचीनं, तथाविधं रेतः धीयते गर्भाशये स्थाप्यते॥

**अग्न इति ॥**

एतस्य मन्त्रस्य चरमपादेन [3]सहोत्तरस्य मन्त्रस्य प्रथमपादोच्चारणं प्रशंसति 'अग्न आ याहि वीतय इत्याह तस्मात् प्रतीचीः प्रजा जायन्ते' इति ॥

यस्मात् 'आ याहि' इत्युक्तं तस्मात् प्रतीचीः प्रत्यङ्मुखाः सदृशाः प्रजाः उत्पद्यन्ते ॥

**प्रेति ॥**

[4]"मन्त्रगतानां पदानामर्थान्" दर्शयति- 'प्र वो वाजा इत्यन्वाह मासा वै वाजा अर्धमासा अभिद्यवो देवा हविष्मन्तो गौर्धृताची यज्ञो देवाञ्जिगाति यजमानः सुम्नयुः' इति॥ [5]वजन्ति

**यज्ञो देवाञ्जिगाति यज॑मानः सुम्नयुरिदमसीदमसीत्येव य॒ज्ञस्य॑ प्रियं धामार्थ रुन्द्धे यं कामयें॒त सर्व॒मायु॑रियादिति प्र वो वाजा इति तस्यनूच्या आ या॑हि वी॒तय॒ इति संत॑तमुत्त॑र॒मर्धर्चमा ल॑भेत (४) प्रा॒णेनै॒वस्य॑पा॒नं दा॑धार॒ सर्व॒मायु॑रेति**

देवाः क्रियया आराध्याः। घृताची घृतमञ्चतीति।

घृतहेतुः गौः हविः प्रदानेन क्रिया- प्रवृत्तिहेतुः।

पूर्ववत् "चौ " (पा ६.३.१३८) इति दीर्घत्वम्, अन्तोदात्तत्वं च (पा ६.१.२२२)।

सः यज्ञः देवान् जिगाति गच्छति तृप्तिहेतुत्वेन।

गाङ् गतौ, व्यत्ययेन परस्मैपदं, शपः श्लुः, अन्यासस्य चेत्त्वम् (पा ७.४.७९)।

---

[1] '.' ख तं३ . श्विभाषाञ्चेरदिक् ००००० रेतः प्रतीचीनम्श इति नास्ति। ,।ख संभावितोयं पाठःय मुद्रितपुस्तके लिखित पुस्तकेषु . श प्राचीनम्श इति। ,।
[2] तं३ ० लं० हो. श्अभिद्यवः दिवसैरू श नास्ति।
[3] ड०श्रृं० सहोत्तर।
[4] ड . मन्त्रगतान् पदार्थान्
[5] अ०इ० उ० जो० पा० हा . त्रजन्ति।

सुम्नयुः सुखमात्मन इच्छतीति सुम्नयुः यजमानः फलभाक्।एवनेते यज्ञस्याधाराः।

एभिस्ताद्रयेण इदम् असि इदम् असि इति [1]अग्निं स्तुत्वा यज्ञस्य प्रियं धाम स्थानं वाजादिकम् अव रुन्द्धे।

यम् इत्यादि॥ एतेन प्रथमद्वितीययोः संतानस्य विशेषणात् [2]आयुर्हेतुत्वेन स्तुतिः क्रियते।

'प्र वो वाजाः' इत्येताम् अनूच्य अस्या उत्तरम् अर्धर्चम् 'अग्न आ याहि वीतये'

(द्र. धापा २५२) गच्छन्ति क्रमेण प्रवर्तन्त इति चैत्रादिमासा वाजाः।

इदमेव ब्राह्मणवाक्यं हृदि निधाय मन्त्रार्थः पूर्वं दर्शितः॥

**इदमिति ॥**

पदार्थानभिधाय मन्त्रतात्पर्यार्थमाह -'इदमसीदमसीत्येव यज्ञस्य प्रियं धामाव रुन्द्धे' इति ॥

समिधेनीभिः समिध्यमान हेग्ने, त्वम् इदं मासानां स्वरूपम् असि, अर्धमासानां स्वरूपम् असि देवानां स्वरूपमसि इति एव तात्पर्यार्थः।

अनेन तात्पर्येण यज्ञस्य प्रियं धाम आहुतिस्थानम् इध्यमानाग्निस्वरूपं संपादितवान् भवति ॥

**यमिति ॥**

यदुक्तं संततमन्वाह [3]"प्राणानामन्नाद्यस्य संतत्यै" इति, तदेवेदानीं काम्यत्वेनापि विधत्ते-'यं कामयेत सर्वमायुरियादिति प्र वो वाजा इति तस्यानूच्यान आ याहि वीतय इति संततमुत्तर- मर्धर्चमा लभेत प्राणेनैवास्यापानं दाधार सर्वमायुरेति' इति ॥

यं यजमानमुद्दिश्य होता कामयेत।

किमिति ? अयं यजमानः [4]अपमृत्युरहितः सर्वम् आयुः प्राप्नुयात् इति। तस्य यजमानस्यायुष्प्राप्तये

**यो वा अंरत्निँ समिधेनीनां वेदांरत्नावेव भ्रातृंव्यं कुरुतेर्धचौ सं दंधात्येष वा**
**अंरत्निँ समिधेनीनां य एवं वेदांरत्नावेव भ्रातृंव्यं कुरुत**

(तैब्रा ३·५·२) इत्यनया संततम् आलभेत। ऋचोर्धमर्धर्चम्।

"ऋक्पूः° (पा ५.४.७४) इति समासान्तः। प्राणेनैवेति। [5]द्वयोः अर्धर्चयोः प्राणापानस्थानीयत्वात्।

दाधार इति छान्दसो लिट्, तुजादित्वादभ्यासस्य दीर्घत्वम् (पा ६-१-७) ॥

'यो वा' इत्यादिना संतानस्य [6]फलान्तरं दर्शयति। समिधामाधानमन्त्राः सामिधेन्यः।

"समिधामाधाने"(पा ४.३.१२० वा १०) इति षेण्यण् प्रत्ययः,(पा ४-१-४१) इति ङीष्, "यस्य" (पा ६-४-१४८) इति लोपे हलस्तद्धितस्य (प ६.४.१५०) इति यलोपः।

तासाम् [7]अरत्निः [8]अरमणम्। नञ्पूर्वादमेर्निप्रत्ययेन्त्य - विकारः।

यद्वा- अरणम् अरत्निः सामिधेनीनां गमनविशेषः। अर्तेरत्निप्रत्ययः।

अथवा द्वौ प्रादेशौ संहितावरग्निः, प्रदेशस्थानीययोरर्धर्चयोः संधानम्। तावेवारत्निरित्युपचर्यते।

प्रथमां सामिधेनीं सर्वाम् अनूच्य विच्छेदमकृत्वोत्तरमन्त्रस्य प्रथमम् अर्धर्चम् उपक्रमेत।

तेन सांतत्येन अस्य यजमानस्य प्राणवायुना बहिर्निर्गच्छता सह एवं अपानवायुं पुनरप्यन्तरा गच्छन्तं धारितवान् भवति।

तेन च धारणेन सर्वम् आयुः प्राप्नोति॥

**य इति ॥**

तदेव सांतत्यं पुनः प्रकारान्तरेण प्रशंसति - 'यो वा अरत्निं सामिधेनीनां वेदारत्नावेव भ्रातृव्यं कुरुतेर्धचौ सं दधात्येष वा अरत्निः सामिधेनीनां य एवं वेदारत्नावेव भ्रातृव्यं कुरुते' इति ॥

कूर्परमारभ्य प्रसारितकनिष्ठाङ्गुलिपर्यन्तो हस्तभागोरत्निः।

न च तस्यारत्नेर्मध्ये विच्छेदोस्ति तद्वदुभयोः सामिधेन्योर्मध्ये सांतत्यम रत्नित्वेनोपचर्यते।

यः होता " [9]तदिदं [10]सांतत्यं विदित्वानुतिष्ठति स होता "भ्रातृव्यं यजमानस्य अरत्नौ स्थापयति।

चतुररत्निपरिमितस्य पुरुषस्या- रत्निमात्र परिमितो बालो यथा नीचो भवति तद्वदमुं कुरुत इत्यर्थः।

यः एवं वेद इति पुनरभिधानं प्रतिज्ञातस्य निगमनार्थम्॥

**ऋषैर्क्रैर्वा एता निर्मिता यत् समिधेन्यंस्ता यदसंयुक्ताः स्युः प्रजयां**

[1] मै . यज्ञम्।
[2] मै४ . प्रयोगहेतुत्वेनय तं३ ण लं . प्रायोहेतुत्वेन।
[3] अण्इण्उण्जीण्नाण्पाण हा . श्प्राणानामन्नाद्यस्य श नास्ति।
[4] आण ड . मृत्युरहितः।
[5] तं३ण्लंण्हो. द्वयोः अस्य।
[6] मै४ . फलान्तराणि।
[7] तं३ लं . आर्तिः।
[8] त्रिण पं२ण हो. अरमणम् अविरमणंय लं. अरमणम् अपिरमणम्।
[9] हो१ . तद्वदिदम्।
[10] हाण हो १ . सातत्यम्।

**प॒शुभि॒र्यज॑मानस्य॒ वि तिष्ठेरन्नर्धचौ सं दधाति**

प्रमाणलक्षणाद्वा सामिधेनीनाम् उच्छ्वासप्रमाणं यः वेद इति।
अरत्नाविति। संधानस्यारत्नि- शब्देनाभिधानस्येदं[1] फलम्।
अरमणे अरमणशीलत्वे प्रादेशद्वयपरिमितत्वे वा शत्रून् कुरुते।
कः पुनः स आसाम् [2]अरत्निरित्याह- अर्धर्चाविति। यजमानव्यतिरिक्तवेदित्रर्थं 'य एवं वेद' इत्यादेः पुनर्वचनम्।
ऋषीणां संबन्धिभ्य आविर्भूताः [3]एताः।
ताः यदि परस्परम् "असंयुक्ताः स्युः तदा या एता ऋषिभ्यो गोत्रकृद्भ्यः [4]भृग्वादिभ्य उत्पन्नाः प्रजाः पशवश्च तैरपि सर्वैरेताः वि "तिष्ठेरन् [5]विश्लिष्टाः स्युः, 'यजमानस्य प्रजापशुसिद्धिहेतवो न स्युरित्यर्थः। तस्मादर्धर्चसंधानेन

**ऋषेकषेरिति ॥**

तदेव सांतत्यं [6]विपक्षबाधकोपन्यासपुरःसरं [7]पुनः प्रशंसति-'ऋषेऋषेर्वा एता निर्मिता यत् सामिधेन्यस्ता यदसंयुक्ताः स्युः प्रजया पशुभिर्यजमानस्य वि तिष्ठेरन्नर्धचौं सं दधाति सं युनक्त्येवैनास्ता अस्मै संयुक्ता अवरुद्धाः सर्वामाशिषं दुहे इति ॥
[8]ऋषिरतीन्द्रियार्थस्य दृष्टा।
तादृश ऋषिरेकैकां सामिधेनीमीश्वरानुग्रहेण दृष्ट्वा तत्संप्रदायपरम्परां निर्मितवान् ॥
अत एव स्मर्यते - " युगान्ते- न्तर्हितान् वेदान् सेतिहासान् महर्षयः।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवा " (मभा १२.२०३.१७) इति ॥
तथा सति भिन्नेभ्य ऋषिभ्यः प्रवर्तिताः ताः समिधेन्यः यदि असंयुक्ताः भवेयुस्तदानीं [9]यजमानस्य प्रजया पशुभिः एताः सामिधेन्यः वि तिष्ठेरन् वियुक्तास्तिष्ठेयुः, प्रजापशुसमृद्धि हेतवो न भवेयुरित्यर्थः।

**सं (५) युंनक्त्येवैना॒स्ता अं॒स्मै॒ संयुक्ता अव॑रुद्धाः सर्वा॑मा॒शिषं॑ दुहे ॥ ७ ॥**

[ बसें वो जायन्ते॒ प्र वो वाजा लभेत दधाति स॒ं दशं च। ]

एताः संयुनक्ति।
'ताः च संयुक्तवत्सा गाव इव गोष्ठे अवरुद्धाः अस्मै यजमानाय सर्वाम् आशिषम् अभिमतमर्थं दुहे स्वयमेव दुहन्ते।
कर्मकर्तरि "न दुहस्नुनमां"(पा ३.१.८९) इति यगभावः, "बहुलं छन्दसि"(पा ७.१.८) इति [10]रुट्, "लोपस्त आत्मनेपदेषु" (पा ७.१.४१) इति तलोपः, "अतो गुणे" (पा ६.१.९७) पररूपत्वम् ॥
[11]"इति द्वितीये" पञ्चमे सप्तमोनुवाकः ॥
तत्परिहाराय पूर्वस्याः सामिधेन्या [12]उत्तरार्धमुत्तरस्याः [13]सामिधेन्याः [14]पूर्वार्धं च संदध्यात्।
तथा सति [15]एनाः सामिधेनीः संयोजितवानेव भवति।
न चैवमेकस्यामपि सामिधेन्यां पूर्वोत्तरार्धच संघातव्याविति शङ्कनीयम्।
तयोरेकर्षिप्रवर्तितत्वेन " [16]होतृप्रयुक्त संधानमन्तरेणापि स्वरूपतो वियोगाभावात्।
यथोक्तरीत्या "संयुक्ताः 'ताः सामिधेन्यो यजमानाय "सर्वाम् 'आशिषं [17]दुहे दुहन्ति संपादयन्ति ॥ [18]अथ मीमांसा ॥
नवमाध्यायस्य प्रथमपादे चिन्तितम्-[19]"त्रिरत्र किमृचो" धर्मः [20]स्थानधर्मोथवादिमः।
स्त्रीलिङ्गत्वान्न तत्प्रातिपदिकप्रचलत्वतः"॥(जैन्या ९.१.१४)॥
दर्शपूर्णमासयोः सामिधेनीः प्रकृत्य श्रूयते -" त्रिः प्रथमामन्वाह," (तैसं २.५.७) इति।
सोयं त्रिरभ्यास आदौ [21]पठितस्य " प्र वो वाजाः " (तैब्रा ३०५०२) इत्यृग्विशेषस्य धर्मः।

---

1 मै४. शब्दाभिधानस्येदं।
2 लं० हो. अरत्निकेत्याह।
3 लं० हो . श्एताः
4 लं० हो . श्भृग्वादिभ्यः श् नास्ति।
5 लं० हो . विशिष्टाः। नास्ति।
6 क० ड० श्टं० हो१ . विपक्ष बाधोप।
7 क . श्पुनःश् नास्ति।
8 ड . °तीन्द्रियस्य।
9 अ० इ० उ० जो० ना० पा० हा . श् यजमानस्य श् नास्ति।
10 तं३ मै . लट्य लं०हो. लुट्।
11 लं० हो . श् इति द्वितीये नास्ति।
12 क० ड० हो१ . उत्तरार्धर्चमु।
13 अ०इ० उ०पा० श्टं०हा . श् सामिधेन्याः श् नास्ति।
14 ड० हो १ . पूर्वार्धर्चम्।
15 क० हा . एताः।
16 ड० हो १ . होतृप्रयुक्तं संधा।
17 अ०इ०उ०ड०पा०हो१.श् दुहेश् नास्ति।
18 ० ड.अत्र।
19 क० श्टं० हो १ . त्रिरनूक्तिचोय ड . त्रिरनुक्ते ऋचो।
20 ड० . धर्मो यथाग्रिमः।
21 अ० उ० ड०ना०पा . प्रमितस्यय जो हो १ . प्रति ; ती द्ध तस्य।

कुतः ? 'प्रथमाम्' इत्यस्य [1]पदस्य स्त्रीलिङ्गत्वात् ऋक्परत्वोपपत्तेरिति चेत्। नैतद्युक्तम्। स्त्रीलिङ्गवाचिन: [2]टाप्- प्रत्ययादपि [3]पूर्वं पठितस्य स्थानवाचिनः प्रथमेत्यस्य प्रातिपदिकस्य प्रबलत्वात्। अतो [4]विकृतिष्वप्यन्यस्या अप्यृचः [5]प्रथमस्थानपठितायास्त्रिरभ्यासः कर्तव्यः। स्थानान्तरे [6]पठितायाः प्र वो वाजाः (तैव्रा ३० ५०२) इत्यस्या अप्यृचो नाभ्यासः ॥

**इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये द्वितीयकाण्डे पञ्चमप्रपाठके सप्तमोनुवाकः ॥ ७ ॥**

---

[1] आ०ड.पदस्य॰ नास्ति।
[2] अ० इ० उ० जो० ना० पा० हा . स्त्रीप्रत्य°।
[3] ड . पूर्व।
[4] क० हो१ . विकृतिष्वन्य ◌ं।
[5] क० हो१ . विकृतिष्वन्य ◌ं।
[6] क० ड० श्रृं० हो १ . प्रथमस्थाने पठि। हो१ . प्रतीतायाः।